# Lomashamuniproktam Balakrishna Kavacham

# लोमशमुनिप्रोक्तं बालकृष्णकवचम्

## Document Information

Text title : Lomashamuniproktam Balakrishna Kavacham

File name : lomashamuniproktaMbAlakRRiShNakavacham.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA, kavacha

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 2 | adhyAya 61/36-47||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# लोमशमुनिप्रोक्तं बालकृष्णकवचम्

तमेनं कथयाम्यद्य स्तवं कृष्णपरायणम् ।
“बालकृष्णोऽस्तु मे प्राच्यां चक्रहेतिः परेश्वरः ॥ ३६॥

गदाधरो बालकृष्णो दक्षिणे मेऽस्तु सर्वदा ।
पश्चिमे शार्ङ्गधृक कृष्णनारायणोऽस्तु मे सदा ॥ ३७॥

उत्तरे खड्गधृक् कृष्णनारायणोऽस्तु मे सदा ।
कोणेष्वस्तु हृषीकेशो मध्ये मध्ये जनार्दनः ॥ ३८॥

पृथ्व्यां वराहरूपोऽस्तु व्योम्नि नरहरिः प्रभुः ।
क्षुरधाराऽतितीक्ष्णं च सुदर्शनं समन्ततः ॥ ३९॥

प्रेतभूतान् प्रहन्त्वेव राक्षसाँश्च निशाचरान् ।
गदा सहस्रधारोर्ध्वं हन्तु वृकान् पिशाचकान् ॥ ४०॥

शार्ङ्गं धनुर्हरेस्तिर्यक्कुष्माण्डादीन् प्रहन्तु च ।
यक्षान् दैत्यान् जृम्भकाँश्च खगान् क्रूरान् विनायकान् ॥ ४१॥

शङ्खो विष्णोर्निनादेन हन्तु दुष्टाँश्च पन्नगान् ।
सिंहान् व्याघ्रान् शरभाँश्च दन्दशूकान् पशूँस्तथा ॥ ४२॥

विष्णोः पद्मं मम शत्रून् सौम्यान् दधातु गन्धतः ।
चित्तवृत्तिहरान् स्मृत्याहरान् बलौजसां हरान् ॥ ४३॥

सम्पद्रोगहराँश्चापि शुभलक्षणहारकान् ।
स्त्रीपुत्रधनसदनहरान् प्रशामयत्वपि ॥ ४४॥

हरेः सङ्कीर्तनाच्चाऽस्तु स्वास्थ्यमैन्द्रियकं मम ।
बुद्धिस्वास्थ्यं मनःस्वास्थ्यं देहस्वास्थ्यं सुखावहम् ॥ ४५॥

पृष्ठे चाग्रे पार्श्वयोश्च कोणेष्वस्तु हरिर्मम ।
शिखायां मे नखेष्वेषः चर्मस्वस्तु हरिर्मम” ॥ ४६॥

“ॐ नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा” ।
इत्येवं राधिके! रक्षास्तोत्रं श्रीलोमशो मुनिः ॥ ४७॥

ददौ सर्वेभ्य एवादौ ततः प्राह निदर्शनम् ।

इति श्रीलक्ष्मीनारायणीयसंहिता । खण्ड २। अध्याय ६१-अध्यायान्तर्गतं लोमशमुनिप्रोक्तं बालकृष्णकवचम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड २। अध्याय ६१/३६-४७॥

lakShmInArAyaNIyasaMhitA . khaNDa 2. adhyAya 61/36-47..

Proofread by PSA Easwaran

*Lomashamuniproktam Balakrishna Kavacham*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*